Andhra Pradesh, India

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(6): 163-166
© 2020 IJSR
www.anantaajournal.com
Received: 10-08-2020
Accepted: 19-10-2020

**S Sitarama Rao**
Assistant Professor, Department of Paraskara Pourohitya, SV Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**S Sitarama Rao**
Assistant Professor, Department of Paraskara Pourohitya, SV Vedic University, Tirupati,

# विवाहाङ्ग माङ्गल्यधारणविचारः

## S Sitarama Rao

## प्रस्तावना

### विवाहसंस्कारप्रशंसा

वि उपसर्गात् वह् धातोः घञ् प्रत्यये कृते विवाहशब्दः निष्पद्यते । विशिष्टं वहनम् इति च शब्दार्थः । संस्कारेषु अत्यन्तं विशिष्टः संस्कारः विवाहसंस्कारः ।

विवाह संस्कारः एकः पवित्रो यज्ञरूपेण भवति । विवाहसंस्कारेण पत्नीमुपलभ्य, प्राजासन्ततिः अवजायते, सन्तानोत्पत्तिं विना मानवः पित्रृणान्नैव मुच्यते । बृहदारण्यकोपनिषदि – सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा[1] इति । पुत्रस्य विवाहसम्भवत्वात् जयरूपं फलं विवाहात् भवति । तैत्तीरीय संहितायामपि ऋणविमोचनं प्रजाया जायते इति वचनमपि गम्यते यथा –

**जायमानो वै ब्राह्मणस्त्रिभिः ऋणवान् जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः**[2] ।

एकाकी पुरुषः असम्पूर्णो भवति । पत्नीवतः तस्य सम्पूर्णता जायते।

अथो अर्थो वा एष आत्मनः यत् पत्नी[3] ।

अपत्नीकः पुरुषः श्रौत-स्मार्त कर्माधिकारी न भवति, पत्नी धर्माऽर्थ कामानां विषये मुख्यत्वेन भवति । याज्ञवल्क्यस्मृति अपरार्कटीका व्याख्यानवसरे एवं विवृणोति । समवर्तनानन्तरं दारसङ्ग्रहणं विधिवत् कार्यमिति दृश्यते ।

पत्नी धर्मार्थकामानां कारणं प्रवरं स्मृतम् ।
अपत्नीको नरो भूप कर्मयोग्यो न जायते ।
ब्राह्मण क्षत्रियोवापि वैश्यः शूद्रोऽपि वा नरः ॥[4]

**गृहस्थाश्रमप्राशस्त्याम् –**

सर्वाश्रमेषु गृहस्थाश्रमः मुख्यत्वेन भवतीति नारदेन उक्तम् –

सर्वाश्रमाणामाश्रेयं गृहस्थाश्रममुत्तमम् ।
यतस्तदपि योषायां शीलवत्यां स्थितं ततः[5] ॥

**तथा च दक्षवचने गृहस्थाश्रमप्राशस्त्यामेवं सन्ति –**

जपे होमे तथा दाने स्वाध्याये च रतः सदा ।
ना सौ तत्फलमाप्नोति ह्याश्रमेण बहिष्कृतः ।
समावर्तन पूर्वन्तु लक्षण्यां स्त्रियमुद्वहेत्[6] ॥

**व्यासवचनानुसारं गृहस्थाश्रमवैशिष्ट्यमधिकृत्यमेवं भवति ।**

गृहस्थाश्रमात् परोधर्मो नास्ति नास्ति पुनः पुनः ।
सर्वतीर्थफलं तस्य यथोक्तं यस्तु पालयेत्[7] ॥

**तस्मात् विवाहं अत्यन्तमहत्वपूर्णकारी संस्कारः भवतीति ज्ञायते । गृहस्थाश्रममाहत्म्यं मनुना एवं विव्रियते ।यथा –**

यथावायुं समाश्रित्य वर्तन्ते सर्वजन्तवः ।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ॥
यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनाऽन्नेन चाऽन्वहम् ।
गृहस्थेनैव धार्यन्ते तस्माज्जेष्ठाऽश्रमो गृही ॥
ऋषयः पितरो देवा भूतान्यतिथयस्तथा ।
आशासते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता[8] ॥

यथा सर्वप्राणिनः वायुमाश्रित्य जीवन्ति ततो गृहस्थमाश्रित्य सर्वे आश्रमाः सन्ति । इतरे आश्रमिणः गृहस्थेन अन्नादिना धार्यन्त इत्यतो गृही ज्येष्ठाश्रमो भवति। ऋषि-पितृ-देव-भूत-अतिथ्यादयो बहवो गृहस्थेभ्यः आशासत इत्यतः तेभ्यः सर्वेभ्यः यद्यत् कर्तव्यं तत्सर्वं गृहस्थेन कर्तव्यमिति भावः, एतादृशं उन्नतं श्रेष्ठं गार्हस्थ्यं विवाहात् सम्भवति । मनुना अन्यस्मिन् प्रकरणे एवं उद्धोष्यते –

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थ प्रभवाश्चत्वारः पृथगाश्रमाः ।
सर्वेऽपि क्रमशस्त्वेते यथा शास्त्रं निषेविताः ।
यथोक्त कारिणं विप्रं नयन्ति परमां गतिम् ।
सर्वेषामपि चैतेषां वेदश्रुतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्तिहि ।
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्[9] ॥इति ॥

ब्रह्मचर्य-वानप्रस्थ-संन्यासाश्रमाणां गृहस्थः आधारभूतः । एतेषु आश्रमेषु यथाशास्त्रं निषेवितः गृहस्थाश्रमोऽपि मोक्षाख्यायै नयति । सर्वाश्रमाणां भरणकारणात् । गृहस्थाश्रमे परोपकारबाहुल्यात् श्रुत्या साक्षात् वैदिकानां अग्निहोत्रादीनां कर्मणां गृहस्थमधिकृत्य विहितत्वात् गृहस्थः श्रेष्ठो भवति । यथा सर्वे नदीनदाः सागरं गत्वा अवस्थितं प्राप्नुवन्ति तथा सर्वे आश्रमिणः गृहस्थसमीपे अवस्थितिं प्राप्नुवन्तीति भावः ।

**माङ्गळ्यविचारः**

**सायनाचार्यः** माङ्गल्यधारणं निर्दिशति तैत्तरीय ब्राह्मणभागभाष्ये आशासाना इति योक्त्रधारणमन्त्रव्याख्यानावसरे –

**पत्न्याः** स्वातन्त्रेण कर्माधिकाराभवात् पत्न्यासह तदधि कारे सति एतदेव योक्त्रं तस्या अनुवृत स्वीकरणलङ्गम् । यथा विवाहे स्त्रियः कण्ठे मङ्गलसूत्रं लिङ्गं तद्वत्[10] ।

योक्त्रधारणं स्त्री उपनयनस्थानीयः इति विषयं निर्दिश्य मङ्गलसूत्रमपि स्त्रियाः विवाहे मङ्गळसूत्रेण अमुष्मिन् युक्ता भवतीति वाक्य निर्देशात् माङ्गळ्यधारणं भाष्यकारेण आचार्यःप्रतिपादितः इति गम्यते ।

गौरीं सम्पूज्य वरो मङ्गळसूत्रं सूक्ष्मकाचमणि सूत्रयुक्तं वधूकण्ठे स्वेष्टदेवतां ध्यायन् बध्नीयात् । तत्रमन्त्रः स्मृतिरत्ने –

माङ्गळ्यतन्तुनानेन मम जीवनहेतुना ।
कण्ठे बध्नामिसुभगे सञ्जीव शरदः शतम्[11] ॥

**वरः वधूं प्रति स्वकीयवस्त्रालङ्कारै भूषयैः भूषयित्वेति विधान पारिजातकारः**

ततो मङ्गलसूत्रं च ध्यायन्निष्टां च देवताम् ।
वध्वाः कण्ठप्रदेशेऽस्या भूषणानि च शक्तितः[12] ॥
शतपथे - हिरण्येन पावयन्ति देवानां वा एतद्रूपम्[13]

विविध स्तोत्रेषु दीवीवैशिष्ठ्यस्मरणकाले च मङ्गलसूत्रप्राधान्यं प्रतिपाद्यन्ते । आदिशङ्कराचार्यकृत सौन्दर्यलहरि स्तोत्रे मङ्गलसूत्रं विशेषेण वर्णितम् । मङ्गलसूत्रे मौक्तिक–विद्रुमधारण सम्प्रदायः हैन्दवधर्मे दक्षिणादि प्रान्तेषु विशेषतया वर्तते । किमर्थमित्युक्ते मौक्तिकं चन्द्रग्रहस्वरूपं भवति । चन्द्रः देह सौख्यं, सौन्दर्यं मनश्शान्तिः, आनन्दः, अन्योन्य दाम्पत्य जीवन कारणं भवति । एवं शरीरे, नेत्रौ, नाड्यः, स्तनौ, स्त्री गुह्य अवयवाः, इन्द्रियाः स्त्रीगर्भं च रक्षयति । सुवर्ण माङ्गल्य धारणेन तेजोवर्धनं मनोल्लासकरं शरीरे दीप्तिः उत्पन्नः भवति । विद्रुमधारणेन कुजग्रह दोषनिवारणः भवति । अति क्रोधः, मूर्खत्वम्, परस्पर कलहत्वम् ऋणपीडा, अग्नि – विद्युत् भयं च नश्यति । एवं कामवाञ्छा, दीर्घसौमङ्गल्यत्वं प्राप्नोति । दृष्टिदोष उदर – रक्तस्राव – गर्भस्राव – ऋतुदोषाः नश्यन्ति । मङ्गलसूत्रस्थित हिरण्यं सूर्यकिरण प्रभावेन स्त्रीणां नाडीकेन्द्राः उत्तेजः करोति । शारीरके – मानसिकेन च अन्योन्य दाम्पत्य जीवने हेतुर्भवतीति कारणेन माङ्गल्यं स्त्रीकण्ठे बध्नाति वरः । एवं रूपेण दम्पत्योः जीवन सौभाग्यानि प्राप्यन्ते । हिरण्येन पावयन्ति, देवानां वा एतद्रूपम्[14] ।

हिरण्यं पवित्ररूपेण देवता स्वरूपेण च भवति । शरीरस्य हिरण्यस्पर्शनेन अनेकविधउपद्रवाणां निवारणं भवति । स्नानकाले हिरण्यस्पर्शनेन शरीरे आरोग्यं प्राप्यते । शरीरे विद्युत् शक्तिं च प्रसादयति हिरण्यम् । स्वर्णे शीतलत्वगुणत्वं वर्तते अतः शरीरे स्थित उष्णांश नियन्त्रणार्थं सहकारी भवति । उत्साहं – पुष्टिं च दीयते । एवं च वन्ध्यत्वमपि त्यात्त्वा गर्भोत्पत्यै सहकारी भवतीति ज्ञायते ।

**हिरण्यधारणप्राशस्त्यं श्रुतौ शुक्लयजुः संहिता सायनभाष्ये एवं भवति –**

आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम् ।
इदँहिरण्यँ वर्चस्वज्जैत्रायाविशतादुमाम्[15]॥

इदमिति त्रिषु मन्त्रेषु हिरण्यं स्तूयते – आयुष्यः आयुष्करम्, वर्चस्यं वर्चस्करम्, वर्च इति अन्नस्य नाम, अन्नसाधनम् । रायस्पोषं - रत्नादिधनानां पोषकं, घनरूपस्य स्वर्गस्य वा षोषकम्, ओद्भिदम्, उद्भवतीति उद्भिद् आकरादि, तस्य सम्बन्धि, तत्र जातम् इत्यर्थः। वर्चस्वत् इदं हिरण्यं मां स्तोतारं जैत्राय शत्रुजयाय आविशतात् अभिमुखम् आगच्छतु ।

न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजँह्येतम् ।यो बिभर्ति दाक्षायणँ हिरण्यँ स देवेषु कुणुते दीर्घमायुः स मनुष्येषु कुणुते दीर्घमायुः[16] ॥

तत् देवैः दत्तं घनं न रक्षांसि राक्षसाः तरन्ति न उल्लङ्घयन्ति नाहसन्ति इत्यर्थः। तथा पिशाचाश्च न तरन्ति । हि शब्दः हेतौ, अत एव हिरण्यं देवनाम् इन्द्रदीनाम् ओजः- बलं यागसाधनताबलं, हविः देवानां बलं भवति । प्रथमजं प्रथमतः आविभूतम् । सर्वाणि वस्तूनि हिरण्येन एव साध्यन्ते इत्यर्थः ।

हिरण्यं-दाक्षायणं, दक्षस्य अपत्यानि दाक्षायणाः, तेभ्यः हितम्, हिरण्यं यः पुरुषः विभति धारयति स पुरुषः देवेषु दीर्घमायुः कृणुते हिरण्येन यागादिकर्माणि कृत्वा देवेषु तत् फलं चिरकाल भङ्क्ते इत्यर्थः । मनुष्यः मनुष्येषु अपि दीर्घमायुः कृणुते ।

यदाबध्नन्दाक्षायणा हिरण्यँशतानीकाय सुमनस्यमानाः ।
तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम्[17] ॥

दाक्षायणाः दक्षस्य युवापत्यानि आदित्यादयः, सुमतस्यमानाः सौमनस्यम् इच्छन्तः, शतानीकाय शतम् अनीकानि सेनाः वस्य, बलाय, यत् हिरण्यम् आबध्नन् अलङ्काररूपेण बन्धनं कृतवन्तः, अतः तत् हिरण्यं मे शतशारदाय शरदां शतं जीवनाय देहे आबध्नामि कटकमुकुटादिरूपेण धारयामि । ततः आयुष्मान् अहं जरदष्टिः जराम् अश्नुते अश्नातीति वा अरदष्टिः जरारहितः यथा येन प्रकारेण आसं भवेयं तथा बध्नामीति सम्बन्धः ।

**उपसंहारः**

मङ्गळ्यधारणेन स्त्रीणां तोजोवर्धनादिगुणाः, दीर्घसौमङ्गल्यत्वम्, आरोग्यकरत्वम्, पुष्ठ्यादीनि लभ्यतेति कारणेन मङ्गळसूत्रं अवश्यं धारयेयुः, तथा च स्त्रीणां सुमङ्गळी चह्नत्वं पत्नीचह्नत्वं च माङ्गल्यधारणेन भवतीति सिद्धं भवति ।

**सन्दर्भ**

1. बृहदारण्यकोपनिषत् 1.5.16
2. तैत्तिरीयसंहिता 6.3.10
3. तैत्तिरीयब्राह्मणम् 3.3.3
4. याज्ञवल्क्यस्मृति अपरार्कव्याख्या 1.51
5. संस्कारगणपतिः पृ 167
6. संस्कारगणपतिः पृ. 167
7. व्याससमृतिः 4.2
8. मनुस्मृति 3.77,78,80
9. मनुस्मृति 6.87-90
10. तैत्तिरीयब्राह्मणम् 3.3.3
11. संस्कारगणपतिः पृ. 264
12. संस्कारगणपतिः पृ. 264
13. काण्वीयशतपथ ब्राह्मणम् 14.5.1.9
14. काण्वीयशतपथ ब्राह्मणम् 14.5.1-9
15. शुक्लयजुः संहिता 33.2.13
16. शुक्लयजुः संहिता 33.2.14
17. शुक्लयजुः संहिता 33.2.15